# 8. लौहतुला

**अभ्यासः**

**प्रश्न: 1. एकपदेन उत्तरं लिखत**
(क) वणिक्पुत्रस्य किं नाम आसीत्?
(ख) तुला कैः भक्षिता आसीत्?
(ग) तुला कीदृशी आसीत्?
(घ) पुत्रः केन हृतः इति जीर्णधनः वदति?
(ङ) विवदमानौ तौ द्वावपि कुत्र गतौ?

**उत्तर:**
(क) धनदेवः
(ख) मूषकैः
(ग) लौहघटिता
(घ) श्येनेन
(ङ) राजकुलम्

**प्रश्न: 2. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत**
(क) देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः किं व्यचिन्तयत्?
(ख) स्वतुला याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?
(ग) जीर्णधनः गिरिगुहाद्वारं कया आच्छाद्य गृहमागतः?
(घ) स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् अवदत्?
(ङ) धर्माधिकारिणः जीर्णधनश्रेष्ठिनौ कथं तोषितवन्तः?

**उत्तर:**
(क) देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः व्यचिन्तयत् यत् यस्मिन् देशे स्ववीर्यतः भोगाः भुक्ताः तत्र विभवहीनः यः वसेत् सः पुरुषाधमः।
(ख) स्वतुला याचमानं जीर्णधनं श्रेष्ठी अकथयत् यत् तुला मूषकैः भक्षिता।
(ग) जीर्णधनः गिरिगुहाद्वारं बृहत्शिलया आच्छाद्य गृहम् आगतः।
(घ) स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं अवदत् यत् नदीतटात् शिशुः श्येनेन हृतः।
(ङ) धर्माधिकारिणः जीर्णधनश्रेष्ठिनौ परस्परं संबोध्य तुला-शिशु-प्रदानेन तोषितवन्तः।

**प्रश्न: 3. स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत**
(क) <u>जीर्णधनः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।
(ख) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय <u>अभ्यागतेन</u> सह प्रस्थितः।

(ग) वणिक् गिरिगुहां <u>बृहच्छिलया</u> आच्छादितवान्।
(घ) सभ्यैः तौ परस्परं संबोध्य <u>तुला-शिशु-प्रदानेन</u> सन्तोषितौ।

**उत्तर:**
(क) <u>कः</u> विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्?
(ख) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय <u>केन</u> सह प्रस्थितः?
(ग) वणिक् गिरिगुहां <u>कया</u> आच्छादितवान्।
(घ) सभ्यैः तौ परस्परं संबोध्य <u>केन/कथम्</u> सन्तोषितौ?

**प्रश्नः 4. अधोलिखितानां श्लोकानाम् अपूर्णोऽन्वयः प्रदत्तः पाठमाधृत्य तं पूरयत**
(क) यत्र देशे अथवा स्थाने ........ भोगाः भुक्ता ........... विभवहीनः यः ........ स पुरुषाधमः।
(ख) राजन्! यत्र लौहसहस्रस्य ........ मूषकाः ........ तत्र श्येनः ........हरेत् अत्र संशयः न।

**उत्तर:**
(क) यत्र देशे अथवा स्थाने स्ववीर्यतः भोगाः भुक्ता तस्मिन् विभवहीनः यः वसेत् स पुरुषाधमः।
(ख) राजन्! यत्र लौहसहस्रस्य तुलां मूषकाः खादन्ति तत्र श्येनः बालकः हरेत् अत्र संशयः न।

**प्रश्नः 5. तत्पदं रेखाङ्कितं कुरुत यत्र**
(क) ल्यप् प्रत्ययः नास्ति
विहस्य, लौहसहस्रस्य, संबोध्य, आदाय

(ख) यत्र द्वितीया विभक्तिः नास्ति
श्रेष्ठिनम्, स्नानोपकरणम्, सत्त्वरम्, कार्यकारणम्

(ग) यत्र षष्ठी विभक्तिः नास्ति
पश्यतः, स्ववीर्यतः, श्रेष्ठिनः सभ्यानाम्

**उत्तर:**
(क) लोहसहस्रस्य
(ख) सत्त्वरम्
(ग) स्ववीर्यतः

**प्रश्नः 6. सन्धिना सन्धिविच्छेदेन वा रिक्तस्थानानि पूरयत**

| | | | | | |
|---|---|---|---|---|---|
| (क) | श्रेष्ठ्याह | = | ...................... | + | आह |
| (ख) | ...................... | = | द्वौ | + | अपि |
| (ग) | पुरुषोपार्जिता | = | पुरुष | + | ...................... |
| (घ) | ...................... | = | यथा | + | इच्छया |
| (ङ) | स्नानोपकरणम् | = | ...................... | + | उपकरणम् |
| (च) | ...................... | = | स्नान | + | अर्थम् |

**उत्तरः**

| | | | | | |
|---|---|---|---|---|---|
| (क) | श्रेष्ठ्याह | = | श्रेष्ठी | + | आह |
| (ख) | द्वावपि | = | द्वौ | + | अपि |
| (ग) | पुरुषोपार्जिता | = | पुरुष | + | उपार्जिता |
| (घ) | यथेच्छया | = | यथा | + | इच्छया |
| (ङ) | स्नानोपकरणम् | = | स्नान | + | उपकरणम् |
| (च) | स्नानार्थम् | = | स्नान | + | अर्थम् |

**प्रश्नः 7. समस्तपदं विग्रहं वा लिखत**

| | विग्रहः | | समस्तपदम् |
|---|---|---|---|
| (क) | स्नानस्य उपकरणम् | = | ...................... |
| (ख) | ............ ............ | = | गिरिगुहायाम् |
| (ग) | धर्मस्य अधिकारी | = | ...................... |
| (घ) | ............ ............ | = | विभवहीनाः |

**उत्तरः**

विग्रहः — समस्तपदम्

(क) स्नानस्य उपकरणम् — स्नानोपकरणम्

(ख) गिरेः गुहायाम् — गिरिगुहायाम्

(ग) धर्मस्य अधिकारी — धर्माधिकारी

(घ) विभवैः हीनाः — विभवहीनाः

**(अ) यथापेक्षम् अधोलिखितानां शब्दानां सहायतया "लौहतुला" इति कथायाः सारांशं संस्कृतभाषया**

| | | | |
|---|---|---|---|
| वणिक्पुत्रः | स्नानार्थम् | लौहतुला | अयाचत् |
| वृत्तान्तं | ज्ञात्वा | श्रेष्ठिनं | प्रत्यागतः |
| गतः | प्रदानम् | | |

**उत्तर:**
जीर्णधनः नाम वणिक्पुत्रः धनाभावात् देशान्तरं गन्तुम् इच्छति स्म। सः स्वलौहतुला श्रेष्ठिनः गृहे निक्षेप भूतां कृत्वा प्रस्थितः। स्वपुरम् पुनः आगत्य सः श्रेष्ठिनं लौहतुलां दातुम् अकथयत्। लौहतुला मूषकैः भक्षिता इति ज्ञात्वा सः श्रेष्ठिनः पुत्रं आदाय स्नानार्थं गतः। गिरिगुहायां च तम् शिशुम् प्रक्षिप्य गृहम् आगतः। कथितः च यत् शिशुः श्येनेन हृतः। कलहं कुर्वन्तौ उभौ राजकुलं गतौ। वृत्तान्तं ज्ञात्वा धर्माधिकारिभिः तौ तुला-शिशु-प्रदानेन सन्तोषितौ।